नानारूपधरो भूत्वा सर्व्वेषामीप्सितप्रदः ।
भविष्यति कलौ सत्यव्रतरूपी सनातनः ॥
य इदं पठते नित्यं शृणोति मुनिसत्तमाः ।
तस्य नश्यन्ति पापानि सत्यदेवप्रसादतः ॥”

इति श्रीस्कन्दपुराणे रेवाखण्डे सत्यनारायणकथानाम ४ अध्यायः ॥*॥ इति श्रीसत्यनारायणव्रतकथा समाप्ता ॥ क्वचित् पुस्तके अध्यायनाम नास्ति । क्वचित् भविष्यपुराणे इति कृत्वा एतत्कथा लिखिता ॥*॥ अथ सत्यनारायणपूजापद्धतिः । आदौ स्वस्तिवाचनपूर्ब्बकं सङ्कल्पं कुर्य्यात् । अद्येत्यादि अमुकतिथौ रात्रौ अमुकगोत्रः श्रीअमुकदेवशर्म्मा अमुककामः गणेशादिदेवतापूजापूर्ब्बकश्रीसत्यनारायणपूजनकथाश्रवणमहं करिष्ये । ततः सूक्तं पठेत् । तत आसनशुद्ध्यादिकं कृत्वा गणेशादिदेवतानवग्रहदिक्पालान् पूजयेत् । लक्ष्मीसरस्वत्यादिपुरुषानादिपुरुषश्रीरामलक्ष्मणपूजां कृत्वा यवतिलैः सत्यनारायणमावाहयेत् । प्रणवव्याहृतीः समुच्चार्य्य भगवन् सत्यनारायण इहागच्छ इहागच्छ इह तिष्ठ इह तिष्ठ मम पूजां गृहाण इत्यादिना आवाह्य पुष्पं गृहीत्वा ध्यायेत् ।

“ध्यायेत् सत्यं गुणातीतं गुणत्रयसमन्वितम् ।
लोकनाथं त्रिलोकेशं पीताम्बरधरं हरिम् ॥
इन्दीवरदलश्यामं शङ्खचक्रगदाधरम् ।
नारायणं चतुर्ब्बाहुं श्रीवत्सपदभूषितम् ।
गोविन्दं गोकुलानन्दं जगतः पितरं गुरुम् ॥”

इति ध्यात्वा एतत् पाद्यं सत्यनारायणाय नमः । अर्घ्यमन्त्रस्तु ।

“व्यक्ताव्यक्तस्वरूपाय हृषीकपतये नमः ।
मया निवेदितो भक्त्या अर्घ्योऽयं प्रतिगृह्यताम् ॥”

एषोऽर्घ्यः श्रीसत्यनारायणाय नमः । पुष्पाञ्जलिं गृहीत्वा ।

“नमस्ते विश्वरूपाय शङ्खचक्रधराय च ।
पद्मनाभाय देवाय हृषीकपतये नमः ।
नमोऽनन्तस्वरूपाय त्रिगुणात्मविभासिने ॥”

नैवेद्यं गृहीत्वा ।

“त्वदीयं वस्तु गोविन्द तुभ्यमेव समर्पितम् ।
गृहाण सुमुखो भूत्वा प्रसीद पुरुषोत्तम ॥”

ततः अञ्जलिं बद्ध्वा पठेत् ।

“अच्युतं पुण्डरीकाक्षं नृसिंहं दैत्यसूदनम् ।
हृषीकेशं जगन्नाथं वागीशं वरदायकम् ॥
गुणत्रयं गुणातीतं गोविन्दं गरुड़ध्वजम् ।
जनार्द्दनं जनानन्दं जानकीवल्लभं जयम् ॥
प्रणमामि सदा सत्यनारायणमतः परम्
दुर्गमे विषमे घोरे शत्रुभिः परिपीड़िते ॥
विविधापत्सु दुष्टेषु तथान्येष्वपि यद्भयम् ।
नामान्येतानि सङ्कीर्त्त्य ईप्सितं फलमाप्नुयात् ॥
सत्यनारायणं देवं वन्देऽहं कामदं शुभम् ।
लीलया च ततं विश्वं येन तस्मै नमो नमः ॥”

ततो दक्षिणां दद्यात् । अच्छिद्रावधारणं कुर्य्यात् । इति सत्यनारायणपूजापद्धतिः ॥

सत्यपुरं, क्ली, (सत्यं पुरम् ।) विष्णुलोकः । यथा,

“ईप्सितञ्च फलं भुक्त्वा चान्ते सत्यपुरं वसेत् ।
इति वः कथितं विप्राः सत्यनारायणव्रतम् ॥”

इति स्कन्दपुराणीयसत्यनारायणव्रतकथा ॥

सत्यफलः, पुं, ( सत्यं फलं यस्य ।) विल्ववृक्षः । इति राजनिर्घण्टः ॥

सत्यभामा, स्त्री, कृष्णपत्नीभेदः । इति शब्दरत्नावली ॥ सा च श्रीकृष्णस्याष्टमहिष्यन्तर्गतमहिषीविशेषः । यथा,—

“अष्टौ महिष्यस्ताः सर्व्वा रुक्मिण्याद्या महात्मनः ।
रुक्मिणी सत्यभामा च कालिन्दी च शुचिस्मिता ॥
मित्रविन्दा जाम्बवती नाग्नजिती सुलक्षणा ।
सुशीला नाम तन्वङ्गी महिष्यश्चाष्टमाः स्मृताः ॥”

इति पाद्मे उत्तरखण्डे ६९ अध्यायः ॥

सत्यभारतः, पुं, (सत्यं भारतं यस्य ।) वेदव्यासः । इति त्रिकाण्डशेषः ॥

सत्ययुगं, क्ली, (सत्यं युगम् ।) चतुर्युगानां प्रथमयुगम् । यथा,—

“कृतं सत्ययुगं त्रेताग्नायी द्वापरयज्ञियौ ।
कलिर्भर्भरकः कर्म्मयुगं पापन्तु पातकम् ॥”

इति त्रिकाण्डशेषः ॥*॥

तस्य कृतनामकारणं यथा,—

“तदुपाधिकृतः कालो ब्रह्मणो जन्मकृत्तुशक्तत् ।
शतसंवत्सरे ब्रह्मा लयं प्राप्नोति हि त्वयि ॥
लयान्ते तन्नाभिमध्यादुत्थितः सृजति प्रभुः ।
ततः कृतयुगान्तेऽहं कालं सद्धर्म्मपालकम् ॥
कृतकृत्याः प्रजा यत्र तन्नाम्ना मां कृतं विदुः ॥”

इति कल्किपुराणे १९ अध्यायः ॥*॥

तद्धर्म्मा यथा,—

“धर्म्मश्चतुष्पादभवत् कृते पूर्ण्णे जगत्त्रयम् ।
देवा यथोक्तफलदाश्चरन्ति भुवि सर्व्वतः ॥
सर्व्वशस्या वसुमती हृष्टपुष्टजनावृता ।
शाठ्यचौर्य्यानृतैर्हीना आधिव्याधिविवर्ज्जिता ॥
विप्रा वेदविदः सुमङ्गलयुता नार्य्यस्तु चर्य्याव्रतैः
पूजाहोमपराः पतिव्रतधरा यागोद्यताः क्षत्त्रियाः ।
वैश्या वस्तुषु धर्म्मतो विनिमयैः श्रीविष्णुपूजापराः
शूद्रास्तु द्विजसेवनाद्धरिकथालापाः सपर्य्यापराः ॥”

इति कल्किपुराणे २८ अध्यायः ॥*॥

तद्युगमानं यथा,

“चत्वारि त्रीणि द्वे चैकं कृतादिषु यथाक्रमम्
संख्यातानि सहस्राणि द्विगुणानि शतानि च ॥”

इति श्रीभागवते १२स्कन्धे ४ अध्याये २श्लोकटीकायां श्रीधरस्वामी ॥ तस्योत्पत्त्यादिर्यथा । वैशाखशुक्लपक्षे तृतीयायां रविवारे सत्ययुगोत्पत्तिः । तत्रावतारचतुष्टयं मत्स्यकूर्म्मवराहनृसिंहाः । पूर्णं पुण्यम् । पापं नास्ति । कुरुक्षेत्रं तीर्थम् । शस्तांशो ब्राह्मणः । मज्जागताः प्राणाः । इच्छामृत्युः । एकविंशतिहस्तपरिमितो मानवदेहः । लक्षवर्षं परमायुः । सुवर्णनिर्म्मितभोजनपात्रम् । सत्ययुगाब्दाः १७२८००० । सत्ययुगस्य राजा बलिः वेणः मान्धाता पुरोरवा धुन्धुमारिकः कार्त्तवीर्य्यः एते षट् चक्रवर्त्तिनः ॥ सत्ययुगस्य लक्षणम् ।

“सत्यधर्म्मरतो नित्यं तीर्थानाञ्च सदाश्रयम् ।
नन्दन्ति देवताः सर्व्वाः सत्ये सत्यपरा नराः ॥”

तत्र तारकब्रह्मनाम यथा,—

“नारायणपरा वेदा नारायणपराः क्षराः ।
नारायणपरा मुक्तिर्नारायणपरा गतिः ॥”

इति मुद्राङ्कितपञ्जिकातः संगृहीतम् ॥

सत्ययुगाद्या, स्त्री, ( सत्ययुगस्य आद्या तिथिरित्यर्थः । ) कृतयुगारम्भकतिथिः । सा तु वैशाखशुक्लतृतीया । तद्विवरणं युगाद्याशब्दे द्रष्टव्यम् ॥

सत्ययौवनः, पुं, ( सत्यमेव यौवनमिव यस्य । ) विद्याधरः । इति जटाधरः ॥

सत्यरतः, पुं, (सत्ये रतः ।) सत्यव्रतराजपुत्त्रः । यथा,—

“त्रिधन्वनः सुतो जातस्त्रय्यारुण इति स्मृतः ।
तस्य सत्यव्रतो नाम तस्मात् सत्यरतः स्मृतः ॥
तस्य पुत्त्रो हरिश्चन्द्रो हरिश्चन्द्राच्च रोहितः ।”

इति मात्स्ये १२ अध्यायः ॥

सत्यलोकः, पुं, (सत्यो लोकः ।) सप्तलोकान्तर्गतलोकविशेषः । यथा,—

“षड्गुणेन तपोलोकात् सत्यलोको विराजते ।
अपुनर्मारका यत्र ब्रह्मलोको हि स स्मृतः ॥”

इति विष्णुपुराणे २ अंशे ७ अध्यायः ॥

जनलोकापेक्षयैव षड्गुणेन द्वादशकोट्युच्छ्रायेण तपोलोकानन्तरं सत्यलोकः । न तु तपोलोकात् षड्गुणेनेति मन्तव्यम् । तथा सत्यष्टचत्वारिंशत्कोट्युच्छ्रायत्वेन ब्रह्माण्डे तस्यावकाशाभावात् । सूर्य्याण्डगोलयोरन्तःकोट्यः स्युः पञ्चविंशतिरिति शुकोक्तेः । सत्यलोक एव कक्षाभेदेन ब्रह्माधिष्ठानात् परं वैकुण्ठलोकादि ज्ञेयम् । एवञ्च भूतलादूर्द्ध्वं पञ्चदशलक्षोत्तरास्त्रयोविंशतिः कोट्यो भवन्ति । सत्यलोकादूर्द्ध्वञ्च पञ्चदशलक्षोनकोटिद्वयादण्डकटाह इति ज्ञेयम् । अपुनर्मारकाः पुनर्मृत्युशून्याः । इति तट्टीका ॥

सत्यवचाः, [स्] पुं, (सत्यं वचो यस्य ।) ऋषिः । इत्यमरः ॥ सत्यवादिनि, त्रि ॥

सत्यवती, स्त्री, (सत्यमस्त्यस्येति । सत्य + मतुप् । मस्य वः । ङीप् ।] व्यासमाता । तत्पर्य्यायः । काली २ योजनगन्धा ३ गन्धकाली ४ झषोदरी ५ व्यासमाता ६ सत्या ७ चित्राङ्गदप्रसूः ८ विचित्रवीर्य्यसूः ९ कन्या १० दाशेयी ११ दाशनन्दिनी १२ । इति शब्दरत्नावली ॥ ( यथा, भागवते । १ । ३ । २१ ।

“ततः सप्तदशे जातः सत्यवत्यां पराशरात् ।
चक्रे वेदतरोः शाखा दृष्ट्वा पुंसोऽल्पमेधसः ।”)